"अधरे कज्जलं चारु दृशोस्ताम्बूलरङ्गिमा ।
प्राणनाथ ! किमेतत्ते वेशविन्यासभङ्गिमा ॥"
इति काव्यचन्द्रिका ॥

भङ्गी, स्त्री, ( भङ्गि + कृदिकारादिति पक्षे ङीप् ।) भङ्गिः । यथा,—
"जानामि मानमलसाङ्गि ! वचो विभङ्गी भङ्गीशतं नयनयोरपि चातुरीञ्च ।
आभीरनन्दनसुखाम्बुजसङ्गशंसी
वंशीरवो यदि न मामवशीकरोति ॥"
इत्युद्भटः ॥

भङ्गुरः, त्रि, ( भज्यते स्वयमेवेति । भन्ज + "भञ्जभासमिदो घुरच् ।" ३ । २ । १६१ । इति कर्म्मकर्त्तरि घुरच् । घित्वात् कुत्वमिति काशिका । स्वयं भञ्जनशीलः । यथा, भागवते ।७।७।४३।
"कामान् कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥")
कुटिलः । इति जटाधरः ॥

भङ्गुरः पुं, ( भञ्ज + घुरच् । कुत्वञ्च ।) नद्या वक्रः । इति शब्दमाला । नदीर वाँक इति भाषा ॥

भङ्गुरा, स्त्री, ( भङ्गुर + टाप् । ) अतिविषा । प्रियङ्गुः । इति राजनिर्घण्टः ॥ ( अतिविषाशब्दे प्रियङ्गुशब्दे चास्य विषयो ज्ञेयः ॥ )

भङ्ग्यं, क्ली, ( भङ्गाया भवनं क्षेत्रमिति । भङ्ग + "विभाषा तिलमाषोमाभङ्गाणुभ्यः ।" ५।२।४। इति पक्षे यत् । ) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गीनम् २ । इत्यमरभरतौ ॥ (भङ्गमर्हतीति । भङ्ग + दण्डादित्वाद् यत् । भङ्गार्हे त्रि ॥ )

भचक्रं, क्ली, ( भानां राशीनां चक्रम् । भानां स्वस्वसंस्थानविशेषैर्विरचितो गोलाकारः पदार्थः । ) राशिचक्रम् । यथा,—
"भ्रमावर्त्तो भचक्रेऽस्मिन् ध्रुवो नाभौ व्यवस्थितः ।
आराचक्रे त्विन्दुभौमौ शुक्रजीवशनैश्चराः ॥
राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः ।
यदा दिक्षु च अष्टासु मेरोर्भूगोलकोद्भवा ॥
छाया भवेत्तदा रात्रिः स्याच्च तद्विरहा-
द्दिनम् ।
सूर्य्येन्दोरुपरागस्तु गोलकच्छायया भवेत् ॥
अन्योन्ययोस्तयोरेव व्यापयोरेव कारणात् ॥
ग्रासमोक्षौ तु जायेते तत्रातः पूर्व्वपश्चिमौ ॥
तत्र पुण्यफलाद्भागः स्नतो राहोस्तु विष्णुना ॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः ॥*॥
अथ भचक्रभ्रमणव्यवस्थामाह ।
"निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत् सदा
भ्रमद्भचक्रं निजमस्तकोपरि ॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा स्वान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भांशै ३६० र्गुणिता
कुपरिधिहृता ४९६७ भवन्त्यंशाः ।
भूमौ कक्षायां वा भागेभ्यो
योजनानि च व्यस्तम् ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
( भानां नक्षत्राणां चक्रमितिविग्रहे नक्षत्रचक्रम् । नक्षत्रसमूहश्च ॥ )

भज, इक् भासि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । ) इक् भञ्जयति । भासि दीप्तौ । इति दुर्गादासः ॥

भज, क पाके । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क भाजयति । विश्राणने इति शाब्दः । विश्राणनं दानम् । इति दुर्गादासः ॥

भज, ञ औ भागसेवयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् । ) ञ विभजति विभजते धनं भ्राता । औ अभाक्षीत् कृष्णं साधुः । इति दुर्गादासः ॥

भजत्. [ त् ] त्रि, ( भजति विभजतीति वा । भज + लटः शत्रादेशः । ) भागकर्त्ता । सेवाकर्त्ता । इति भजधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम् ॥

भजनं, क्ली, (भज + भावे ल्युट् ।) भागः । सेवा । इति भजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ।
"दारास्ते ये भजनसहायाः
पुत्रास्ते ये तद्गतकायाः ।
धनमपि तद्यद्धरिभजनार्थं
नो चेदेतत् सर्व्वं व्यर्थम् ॥"
इति मोहमुद्गरः ॥

भजमानः, त्रि, (भजते फलमनुबध्नातीति । भज + "ताच्छील्यवयोवचनशक्तिषु चानश् ।" ३ । २ । १२९ । इति चानश् । शानच् वा । ) न्याय्यम् । न्यायागतद्रव्यादिः । इत्यमरः । २ । ८ । २४ ॥ भागकर्त्ता । सेवाकर्त्ता । इति भजधातोः कर्त्तरि शानप्रत्ययेन निष्पन्नम् ॥ ( सात्वतनृपस्य पुत्त्रभेदः । यथा, भागवते । ९ । २४ । ६ ।
"पुरुहोत्रस्त्वनोः पुत्त्रस्तस्यायुः सात्वतस्ततः ।
भजमानो भजिर्दिव्योऽवृष्णिर्देवावृधोऽन्धकः ॥")

भञ्जकः, त्रि, ( भञ्ज् + ण्वुल् । ) भञ्जनकर्त्ता । भनक्ति यः इत्यर्थे भन्जधातोः कर्त्तरि णकप्रत्ययेन निष्पन्नः ॥

भञ्जन्, त्रि, वर्त्तमानभञ्जनाश्रयः । इति भन्जधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम् ॥

भञ्जनं, क्ली, मोटनम् । इति भन्जधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १२ । ५९ । ६२ ।
"यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः ।
अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनम् ॥")

भञ्जनकः, पुं, ( भनक्ति आमर्द्दयतीति । भञ्ज + ल्युः । ततः स्वार्थे संज्ञायां वा कन् ।) मुखरोगविशेषः । तस्य निदानादि यथा,—
"वक्रं वक्रं भवेद्यस्य दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥"
इति माधवकरः ॥

भञ्जरुः, पुं, ( भनक्तीति । भञ्ज + बाहुलकात् अरुप्रत्ययः । ) देवकुलोद्भूततरुः । तत्पर्य्यायः । काचिमः २ । इति त्रिकाण्डशेषः ॥

भञ्जा, स्त्री, ( भनक्ति भयादिकमिति । भञ्ज + अच् । टाप् । ) अन्नपूर्णा । यथा,—
"भीतिहा भयहन्त्री च भावनावशवर्त्तिनी ।
भीमाङ्गवासिनी भञ्जा भित्तिसंवित्तिवर्द्धिनी ॥"
इति रुद्रयामले सप्तविद्यारहस्यम् ॥

भट, भृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) भृतिरिह पोषणम् । कर्म्ममूल्यमिति गोविन्दभट्टः । भटति भृत्यं स्वामी । इति दुर्गादासः ॥

भट म भाषणे । इति कविकल्पद्रुमः । ( भ्वा०-पर०-सक०-सेट् घटादिः । ) म भटयति । भाषणं कथनम् । इति दुर्गादासः ॥

भटः, पुं, ( भव्यते भ्रियते इति । यद्वा भटतीति । भट + अच् ।) योद्धा । इत्यमरः । २ । ८ । ६१ ॥ ( यथा, भागवते । ८ । १० । ६ ।
"उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ।
केचिद्गौरमुखैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥"
म्लेच्छभेदः । इति हेमचन्द्रः ॥ वीरः । ( यथा, नैषधे । १० । १३२ ।
"पदे पदे सन्ति भटा रणोद्भटा
न तेषु हिंसारस एष पूर्य्यते ।
धिगीदृशन्ते नृपते ! कुविक्रमं
कृपाश्रये यः कृपणे पतत्त्रिणि ॥")
पामरविशेषः । इति मेदिनी । टे, २४ ॥ रजनीचरः । इति शब्दरत्नावली ॥ वर्णसङ्करविशेषः । यथा;
"वर्द्धकाराद्भटो जातो नाटिक्यां वरवाहकः ॥"
इति पराशरपद्धतिः ॥

भटा, स्त्री, ( भट + टाप् । ) इन्द्रवारुणी । इति रत्नमाला । राखालशसा इति भाषा ॥

भटित्रं, क्ली, ( भटति भव्यते वेति । भट् + इत्र ।) शूलपक्वमांसादि । इत्यमरः । २ । ९ । ४५ ॥ काबाब इति पारस्यभाषा ॥

भट्टः, पुं, ( भटतीति । भट् + बाहुलकात् तन् । ) जातिविशेषः । भाट इति भाषा । तस्योत्पत्तिर्यथा,—
"वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव ह ।
स भट्टो वावदूकश्च सर्व्वेषां स्तुतिपाठकः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥
अपि च ।
"क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽनुवाचकः ॥"
इति युधिष्ठिरपरशुरामसंवादे जातिसङ्करलक्षणम् ॥ शिविरान्तिके राज्ञा तस्य वासो देयः । यथा,
"ब्राह्मणं क्षत्त्रियं वैश्यं सच्छूद्रं गणकं शुभम् ।
भट्टं वैद्यं पुष्पकारं स्थापयेत् शिविरान्तिके ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०१ अः ॥

भट्टाचार्य्यः, पुं, ( भट्टः तुतातभट्टः । आचार्य्यः उदयनाचार्य्यः तौ तुल्यतया तन्मताभिज्ञत्वेना-